# QP CODE

# T6067

**Enrollment Number: ………………**

**Name: ……………………………….**

**BA DEGREE EXAMINATIONS, MAY 2024**

**Third Semester**

**B.A. Sanskrit Language and Literature**

**B21SN03DC - व्याकरणपरिचयः**

**(2022 admissions)**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या।**

(Answers should be written in Sanskrit using Devanagari script)

**Time: 3 Hours** **Max Marks: 70**

## Section A

**एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानाम् उत्तराणि लिखत।**

1. माहेश्वरसूत्राणि लिखत।
2. उदात्तो नाम कः?
3. कात्यायनः कः?
4. व्याकरणशास्त्रे संहिता नाम का?
5. गो+यूतिः इत्यत्र अवादेशः केन वार्तिकेन भवति?
6. गुणसंज्ञाविधायकं सूत्रं किम्?
7. अनुनासिकस्य अचः इत्संज्ञा केन सूत्रेण विधीयते?
8. र इति प्रत्याहारे कौ वर्णौ इति लिखत।
9. झलां जशोऽन्ते इति सूत्रस्य पदच्छेदं प्रदर्शयत।
10. विसर्जनीयस्य सः इति सूत्रस्यार्थं लिखत।
11. विप्रतिषेधे परं कार्यम् इति सूत्रस्यार्थं लिखत।
12. कारकाणि कति सन्ति?

13. भूतपूर्वः इत्यस्य  विग्रहवाक्यं लिखत?

14. समासाशास्त्रे उपसर्जनसंज्ञा कस्य भवति?

15. द्विगुसंज्ञाविधायकं सूत्रं लिखत।

**(1X10=10)**

## Section B

**एकेन वाक्येन द्वाभ्यां वा  केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।**

16. अकारस्य अष्टादशभेदान् लिखत।

17. झलां जश् झशि इति सूत्रस्यार्थं लिखत।

18. पौ+अकः – अत्र सन्धिः कथम्?

19. उपसर्गाः कति? के च ते?

20. प्रत्ययशब्दस्य कः अर्थः?

21. तस्मादित्युत्तरस्य इति सूत्रस्यार्थं लिखत।

22. शिवस्+अर्च्यः – सन्धिकार्यं प्रदर्शयत।

23. कर्तृकरणयोस्तृतीया इत्यस्य सूत्रस्यार्थं लिखत।

24. वृत्तिः का? वृत्तिभेदान् च प्रदर्शयत।

25. समर्थः पदविधिः इत्यस्यार्थं लिखत।

**(2X5=10)**

## Section C

**एकखण्डिकया केषाञ्चित्  षड्प्रश्नानाम् उत्तराणि लिखत ।**

26. सुद्ध्युपास्यः इत्यस्य सन्धिकार्यं सूत्राण्युद्धृत्य प्रदर्शयत।

27. हर इह, हरयिह, कृष्णैकत्वम्, गङ्गौघः  एषां सन्धिकार्यं प्रदर्शयत।

28. प्लुतप्रगृह्याः अचि नित्यम् इति सूत्रं व्याख्याय प्रगृह्यसंज्ञा केषां भवतीति सूत्राणि व्याख्याय विशदयत।

29. स्तोः श्चुना श्चुः इति सूत्रं सोदाहरणं व्याख्यात।

30. उत् + स्थानम् – अत्र सन्धिकार्यं विशदयत।

31. अकथितं च इति सूत्रं सोदाहरणं व्याख्यात।

32. सम्प्रदानसंज्ञां विधाय चतुर्थीविभक्तिः कुत्र कुत्र भवतीति विशदयत।

33. अधिकरणकारकं सप्रमाणं विशदयत।

34. वागर्थाविव, अधिहरि अनयोः समासकार्यं सविशदं प्रदर्शयत।

35. द्वितीयाश्रितातीतगतात्यस्तप्राप्तापन्नैः – सूत्रमिदं सोदाहरणं व्याख्यात।

36. यूपदारु, द्विजार्थः सूपः – अनयोः समासकार्यं विशदयत।

37. अन्तिकादागतः, राजपुरुषः – एतयोः ससासकार्यं ससूत्रं विशदयत।

**(5X6=30)**

## Section D

**पुटैकेन द्वाभ्यां वा केषाञ्चित् द्वयोः प्रश्नयोः उत्तराणि लिखत।**

38. तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रं व्याख्याय वर्णानाम् उच्चारणस्थानानि बाह्याभ्यन्तरप्रयत्नांश्च विशदयत।

39. पौर्वशालः, पञ्चगवधनः, नीलोत्पलम्, पञ्चगवम् – एषां समासकार्यं सविशदं प्रदर्शयत।

40. पीताम्बरः, कण्ठेकालः, प्राप्तोदकः, ऊढरथः – एषां समासकार्यं सविशदं प्रदर्शयत।

41. गङ्गोदकम्, प्रष्ठौहः, विद्वाँल्लिखति, हरिं वन्दे एषां सन्धिकार्यं विशदयत।

**(10X2=20)**